## PART–IV

## LANGUAGE–I

## SANSKRIT

| |
|---|
| अभ्यर्थिनः **चतुर्थभागस्य (Part-IV)** प्रश्नानाम् **( प्र.सं. 91-120 )** उत्तरं दद्युः, यदि तैः **संस्कृतं प्रथमभाषा**रूपेण **(Language-I)** चितम्। |

**निम्नलिखितं गद्यांशं पठित्वा नव प्रश्नानां (91 - 99) यथोचितं विकल्पं चित्वा उत्तराणि देयानि।**

लौहपुरुषः सरदारवल्लभभाईपटेलः जन्मतः कृषकः आसीत्। अस्य जन्म 1875 तमे ईस्वीये वर्षे अक्तूबरमासस्य एकत्रिंशत् (31) तारिकायां गुर्जरप्रदेशे अभवत्। अस्य पिता 1857 वर्षस्य प्रथमस्वतन्त्रतायुद्धे सहभागी आसीत्। यद्यपि अयं महापुरुषः आङ्लदेशात् विधिपरीक्षायां प्रथमश्रेण्यां प्रथमं स्थानं लब्ध्वा अधिवक्ता जातः, तथापि सः स्वकीयं सम्पूर्णजीवनं भारतस्य स्वतन्त्रता–संग्रामाय अर्पितवान्। अयं बारदोली–कृषकाणाम् आन्दोलनस्य सफलं नेतृत्वम् अकरोत्। तेन कारणेन महात्मना गान्धिना ''सरदार'' इति उपाधिना सम्मानितः। गुर्जरप्रदेशे जलौघ–पीडितानां भूकम्पपीडितानां च एषः अहर्निशं सेवाम् अकरोत्।

अनेकवारं सः कारागारे पातितः। तस्य वृद्धा माता आङ्लाधिकारिभिः प्रताडिता। 1942 तमे वर्षे ''भारतं त्यजत'' इति आन्दोलने स अकथयत्–न केवलं भारतं त्यजत अपितु एशियामेव त्यजत इति वक्तव्यम्।

स्वतन्त्रभारतस्य स उपप्रधानमन्त्री अभवत्। भारतं तदा अनेकेषु लघुराज्येषु विभक्तम् आसीत्। एषः स्वनीतिचातुर्येण षट्शतस्वदेशीयराज्यानाम् अखण्डे भारते विलयम् अकरोत्।

लौहपुरुषः श्रीपटेलः अतीव अनुशासनप्रियः आसीत्। तस्य प्रत्येकं शब्दः आदेश इव मन्यते। भारतम् एव तस्य क्षेत्रं, समस्तभारतजनता एव तस्य परिवारः। भारतस्य वर्तमानं स्वरूपं तस्य एव सत्प्रयत्नानां परिणामः। अस्माकं दुर्भाग्यवशात् 1950 तमे वर्षे दिसम्बरमासस्य पञ्चदशतारिकायां अयं लोकमान्यः दिवं गतः। भारतं तस्य उपकारं कदापि न विस्मरिष्यति।

**91.** यः न्यायालये कस्य अपि अन्यस्य स्थाने तर्कं प्रस्तौति स कः कथ्यते ?

(1) अधिवक्ता (2) प्रस्तोता (3) तार्किकः (4) साक्षी

**92.** 'उपाधिना' इत्यस्मिन पदे का विभक्तिः किम् लिङ्गम् च वर्तते ?

(1) चतुर्थी–बहुवचनम्, स्त्रीलिङ्गे (2) षष्ठी–बहुवचनम्, पुल्लिंङ्गे

(3) तृतीया–एकवचनम्, स्त्रीलिङ्गे (4) तृतीया–एकवचनम्, पुल्लिंङ्गे

**93.** 'जलौघ' शब्दः गद्यांशे कस्मिन्नर्थे प्रयुक्तः ?

(1) नद्याम् (2) जलसमूहे (3) समुद्रे (4) सरोवरे

**94.** 'अहर्निशम्' पदं निम्नलिखितेषु कस्यां कोट्यां मन्यते ?

(1) कर्मकारकः (2) अधिकरणम् (3) विशेषणम् (4) क्रियाविशेषणम्

**95.** 1857 वर्षस्य स्वतन्त्रतायुद्धे कः भागं गृहीतवान् ?

(1) महात्मागान्धी (2) पं. जवाहरलाल नेहरू

(3) सरदारवल्लभभाईपटेलः (4) सरदारवल्लभभाईपटेलस्य पिता

**96.** 1875 तमे ईस्वीय वर्षे कस्य जन्माभवत् ?

(1) बालगंगाधरतिलकस्य (2) राजाराममोहनरायस्य

(3) सरदारवल्लभभाईपटेलस्य (4) सरदारवल्लभभाईपटेलस्य पितुः

**97.** बारदोली–कृषक–आन्दोलनस्य नेतृत्वं केन कृतम् ?

(1) सुभाषचन्द्रबोसेन (2) मदनमोहनमालवीयेन

(3) महात्मागान्धिना (4) बालगङ्गाधरतिलकेन

98. पटेल: 'सरदार' इति उपाधिना केन सम्मानित: ?

(1) के.एम. मुन्शिना (2) आङ्गलसर्वकारेण

(3) महात्मागान्धिना (4) मदनमोहनमालवीयेन

99. 'वक्तव्यम्' पदस्य निर्वचनम् किं भवति ?

(1) वच् + तव्यम् (2) वद् + तव्ययम् (3) वक् + तव्यम् (4) वक् + व्यम्

**निम्नलिखितानि पद्यानि पठित्वा षट् प्रश्नानां (100 - 105) उत्तराणि यथोचितान् विकल्पान् चित्वा देयानि।**

अभिवादनशीलस्य नित्यं वृद्धोपसेविन:।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।1।।
हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्।
श्रोत्रस्य भूषणं शास्त्रं भूषणै: किं प्रयोजनम्।।2।।
पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्।।3।।
नमन्ति फलिनो वृक्षा: नमन्ति गुणिनो जना:।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन।।4।।
अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्।
अधनस्य कुतो मित्रम् अमित्रस्य कुत: सुखम्।।5।।

100. 'उत्पन्न' इत्यस्य पदस्य निर्वचनम् क्रियताम्–

(1) उत् + पद् + न (2) उत् + पत् + क्त (3) उत् + पन् + न (4) उद् + पद् + क्त

101. का विद्या कार्यकाले नोपयुज्यते ?

(1) परहस्तगता (2) पुस्तकस्था

(3) वार्धक्ये गृहीता (4) देशकालानुसारं न उपयुक्ता

102. 'फलिनो वृक्षा:' किं कुर्वन्ति ?

(1) ऊर्ध्वोन्मुखा: वर्धन्ते (2) नमन्ति

(3) शुष्यन्ति (4) प्राणिन: भोजनम् प्रददति

103. वृद्धोपसेविन: किम् न वर्धते ?

(1) धनम् (2) विद्या (3) यश: (4) बलम्

104. 'गुणिन:' पदस्य पद्यस्यप्रयोगानुसारम् किं निर्वचनम् ?

(1) गुणिन् + षष्ठी–एकवचनम् (2) गुणिन् + पञ्चमी–एकवचनम्

(3) गुणिन् + द्वितीया–बहुवचनम् (4) गुणिन् + प्रथमा–एकवचनम्

105. हस्तस्य भूषणम् किम् अस्ति ?

(1) रजतम् (2) दानम् (3) अलङ्कार: (4) स्वर्णम्

106. कश्चिद् भाषा–अध्यापक: छात्रान् एकां प्रश्नावलीं ददाति यथा स तेषां शिक्षणपद्धतिं वरीयतां च भूयस्तरं ज्ञातुं शक्नुयात्। अत्र अध्यापक: निम्नलिखितरूपेण कार्यं करोति –

(1) विशेषज्ञसूचनां प्रदातृरूपेण (2) निदानकर्तृरूपेण

(3) प्रबन्धकरूपेण (4) योजनानिर्मातृरूपेण

107. **कथनम् ( अ ) :** कक्षायां शिक्षण-अनुभवा: छात्राणां जीवनेन प्रसङ्गैश्च गहनतया सम्बन्धिता सन्ति।

**कारणम् ( आ ) :** शिक्षण-अनुभवा: छात्राणां पूर्व-अवबोधे आश्रिता: सन्ति।

निम्नलिखितविकल्पेभ्य: **समीचीनम्** उत्तरं दीयताम्।

(1) **( अ )** सत्यम् अस्ति, परं **( आ )** असत्यम् अस्ति।

(2) **( अ )** असत्यम् अस्ति, परं **( आ )** सत्यम् अस्ति।

(3) उभे **( अ )**, **( आ )** च सत्ये स्त: तथा **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या अस्ति।

(4) उभे **( अ )** तथा **( आ )** सत्ये स्त:, परं **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या नास्ति।

108. भाषाशिक्षणस्य विषये किं कथनं निम्नलिखितेषु सत्यं नास्ति ?

(1) भाषाशिक्षणम् अर्थबोधोऽस्ति।

(2) भाषां शिक्षितुं व्याकरणशिक्षणम् आवश्यकं वर्तते।

(3) सर्वे छात्रा: सुगमतया भाषां शिक्षितुं समर्था: यदि भाषायै पर्याप्तं समय: दीयते।

(4) भाषाशिक्षणाय समयस्य अपेक्षा वर्तते।

109. **कथनम् ( अ ) :** भाषा तर्कपूर्ण सांस्कृतिक-अवबोधं अभिव्यक्तिं च प्रददाति या बालकेषु वर्धिष्यमाणासु योग्यतासु मुख्या क्षमता मन्यते।

**कारणम् ( आ ) :** सांस्कृतिक-अवबोधस्य अभिव्यक्तेश्च क्षमता: बालकेषु अभिज्ञानस्य योग्यतां वर्धन्ते तथा अपर संस्कृती: अभिज्ञानश्च जानन्ति।

निम्नलिखितेभ्य: विकल्पेभ्य: **यथोचितानि** उत्तराणि दीयन्ताम्।

(1) **( अ )** सत्यमस्ति, परं **( आ )** असत्यम् अस्ति।

(2) **( अ )** असत्यम् अस्ति, परं **( आ )** सत्यम् अस्ति।

(3) **( अ )** तथा **( आ )** सत्ये स्त: तथा **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या अस्ति।

(4) **( अ )** तथा **( आ )** सत्ये स्त: परं **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या नास्ति।

110. **कथनम् ( अ ) :** छात्रस्य पत्राधानम् (Portfolio) छात्रस्य कार्यस्य अंशानाम् उद्देश्यपूर्णं संचयनम् अस्ति।

**कारणम् ( आ ) :** पत्राधानं छात्रान् स्वशक्ते: दुर्बलताया: च मूल्यांकनं कर्तुं प्रोत्साहयति।

निम्नलिखितविकल्पेषु **समुचितं** उत्तरं दीयताम्।

(1) **( अ )** सत्यम् अस्ति, परं **( आ )** असत्यम् अस्ति।

(2) **( अ )** असत्यम् अस्ति, परं **( आ )** सत्यम् अस्ति।

(3) **( अ )** तथा **( आ )** उभे सत्ये स्त: तथा **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या अस्ति।

(4) **( अ )** तथा **( आ )** उभे सत्ये स्त:, परं **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या नास्ति।

111. पाठ्यपुस्तकेषु कथा:, कविता:, नाटकानि, लेखकानां अन्यप्रकारस्य लेखा: भवन्ति। अस्माभि: एतादृश्य: सामग्र्य: चेतव्या: यत: ____________.

(1) सुप्रसिद्धलेखकै: लिखिता: सन्ति।

(2) ता: सरलभाषायां सन्ति।

(3) ता: प्रामाणिका: सन्ति तथा प्राकृतिकभाषायां सन्ति।

(4) पाठ्यपुस्तकेषु प्रयोगस्य उद्देश्येन लिखिता: सन्ति।

112. निम्नलिखितेषु किं पठनस्य उपकौशलं नास्ति ?

(1) विशेषसूचनां प्राप्तुं क्रमवीक्षणम् (Scanning)

(2) प्रत्येकशब्दस्य वर्तनीज्ञानम्

(3) शब्दावल्या: अभिज्ञानं मुख्यशब्दानां च ग्रहणम्

(4) अर्थनिष्कर्षणम् तथा अपरिचितशब्दकोषीयशब्दानां प्रयोग:

**113.** भाषाविकासस्य संज्ञानात्मकसिद्धांत: एतत् समर्थयति यत् –

(1) समाजे अन्त:सम्पर्कमाध्यमेन शिक्ष्यते। (2) भाषा बालकस्य भाषणात् पूर्वं तस्य विचारावबोधने अवलम्बिताऽस्ति।
(3) भाषा व्यक्ते: सहजातयोग्यता अस्ति। (4) भाषा पुरस्कारदण्डयो: माध्यमेन शिक्ष्यते।

**114.** चित्राणां विषये किं कथनम् असत्यम् अस्ति ?

(1) एतादृशानि चित्राणि निर्मातुम् अवसरं प्रददति
(2) अपरिचितेषु स्मरणीयेषु च प्रसङ्गेषु भाषां प्रस्तौतुं सहायतां कुर्वन्ति
(3) पुस्तकेषु चित्राणि उदाहरणानि च विषय–वस्तु समर्थयन्ति
(4) छात्राणां रुचिं धारयन्ति

**115.** बालछात्रस्य सन्दर्भे किं कथनम् सत्यम् अस्ति ?

(1) अतिलघुवयस्का: छात्रा: आंशिकरूपेण अमूर्तविचारान् अवबोधयन्ति।
(2) अतिलघुवयस्का: छात्रा: अमूर्तविचारै: प्रेर्यन्ते।
(3) अतिलघुवयस्का: छात्रा: अमूर्तविचारान् अवबोधयन्ति।
(4) अतिलघुवयस्का: छात्रा: अमूर्तविचारान् अवबोधयितुं कठिनं मन्यन्ते।

**116.** प्रथमकक्षाया: अध्यापक: छात्रान् भित्तौ आरेखितुं, चित्रितुं तथा यथेष्टं लेखितुं कथयति। स अत्र किं प्रोत्साहयति ?

(1) लेखनकौशलविकासम् (2) वर्णमालाया: अक्षराणां लेखनस्य प्रारम्भम्
(3) नवोदितसाक्षरताविकासम् (4) आमोद – प्रमोदम्

**117.** कश्चिद् अध्यापक: भाषाशिक्षणस्य काञ्चित् पक्षान् प्राप्तवान् यथा 'वैज्ञानिकविचारे अवबोधेन सह पठनम्'। स: काञ्चित् छात्रान् अचिनोत् ये विशेषपक्षेषु काठिन्यम् अनुभवन्ति। स तेषां पाठस्य पठने अर्थावबोधने च सहायतां कर्तुम् पृथक् कक्षा: गृहीतवान्। अयं प्रविधि: किं ज्ञायते ?

(1) चिन्तनकौशलम् (Thinking Skills)
(2) प्रतिपूर्तिशिक्षणम् (Feedback Teaching)
(3) संशोधनात्मकशिक्षणम् (Remedial Teaching)
(4) उच्चतरकौशलम् (Higher Order Skills)

**118.** एतद् ज्ञातुं यत् छात्रा: कस्मिञ्चिद् आपणे किमपि क्रेतुं कार्ययोग्यसाधनस्य प्रयोगं कर्तुं समर्था: सन्ति, छात्राणां कृते एतत् समीचीनम् अस्ति ?

(1) आपणस्वामिन: ग्राहकाणां मध्ये वार्तालापम् आधृत्य एकाम् लघुकथां लिखन्तु
(2) आपणस्वामिन: ग्राहकाणां च मध्ये दृश्याङ्कनम् कुर्यु:
(3) आपणस्वामिन: ग्राहकाणां च मध्ये लघु वार्तालापं लिखन्तु।
(4) आत्मन: भोजनवरीयताविषये लिखन्तु

**119.** अध्यापकरूपेण भवान् स्वकक्षायां छात्राणाम् अन्त:सम्पर्कं वर्धिष्यते ?

(a) छात्रान् भूयस: प्रश्नान् पृष्ट्वा।
(b) सहयोगिकार्यं, समूहकार्यं च आयोज्य तथा छात्राणां विचारान् आमन्त्र्य।
(c) तै: उच्चै: पाठनं कारयित्वा तथा व्यक्तिश: प्रतिक्रियां ज्ञात्वा येन व्यक्तिश: शिक्षाग्रहणं भवेत्।
(d) अन्त:सम्पर्काय प्रश्नान् प्रष्टुं संवादान् पठित्वा।

(1) (a), (b), (d) स्यानि सन्ति (2) (a), (c), (d) स्यानि सन्ति
(3) (a), (b), (c) स्यानि सन्ति (4) (b), (c), (d) स्यानि सन्ति

**120.** छात्राणां शब्दावलीं वर्धयितुं, कश्चिद् अध्यापक: तां सामग्रीं प्रयुनक्ति यस्यां सा भाषा वर्तते या छात्राणां कृते सरलीकृता, तथा च प्रामाणिक–सामग्र्याम् आधारिता अस्ति। सामग्री अस्ति –

(1) द्विभाषीया: शब्दकोशा: (2) श्रेण्या: पाठका: (Graded Readers)
(3) समाचारपत्रम् (4) अभिनयपत्राणि (Role Cards)

## PART–V

## LANGUAGE–II

## SANSKRIT

अभ्यर्थिनः **पञ्चमभागस्य (Part-V)** प्रश्नानाम् **( प्र.सं. 121-150 )** उत्तरं दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा (Language-II)** रूपेण चितम्।

**निम्नलिखितं गद्यांशं पठित्वा अष्ट प्रश्नानाम् (121 - 128) यथोचितं विकल्पं चित्वा उत्तराणि देयानि।**

कस्मिंश्चिद् देशे कश्चिद् भूपतिः आसीत्। तस्य नाम मायादासः। अतिलुब्धः सः दरिद्रः इव जीवितं नयति स्म।

एकदा कोऽपि मुनिः मायादासस्य प्रासादम् आगच्छत्। नृपतिः तं मुनिं सत्कारेणातोषयत्। नृपतिना सत्कृतः सन्तुष्टः मुनिः अवदत्–'नृपते! स्वस्त्यस्तु ते। अभीष्टं वरं वरय' इति। मुनिनैवम् उक्तः स लोभेन प्रेरितः अवदत् – 'मया स्पृश्यमानाः पदार्थाः सौवर्णाः भवन्तु' इति। 'तथास्तु' इत्युक्त्वा मुनिः अन्तर्हितः अभवत्।

मुनेः वरं लब्ध्वा गृहं प्रविष्टः मायादासः तत्र स्थितानि वस्तूनि अस्पृशत्। तेन स्पृष्टानि वस्तूनि सद्य एव सौवर्णानि जातानि। तद्दृष्ट्वा सः नितरामतुष्यत्। ततः तस्य महती पिपासा जाता। सः जलं पातुम् उद्यतः अभवत्। तेन स्पृष्टं जलमपि सुवर्णपिण्डमभवत्। साधूक्तं न मृषा भवति।

तस्मिन् अवसरे तस्य पुत्री कुसुममञ्जरीमादाय तत्रागता। 'पितः अतीव सुन्दराणीमानि कुसुमानि' इति चावदत् नृपतिः तां मञ्जरीं करेणास्पृशत्। तेन स्पृष्टा मञ्जरी सुवर्णमयी जाता। तद् दृष्ट्वा कुमारी दुःखिता अभवत्। सुतां समाश्वासयितुं प्रवृत्तः सः मायादासः ताम् अङ्के उपवेशयति स्म। हन्त, कुमारी सुवर्णमयी सञ्जाता। मायादासः शोकेनोच्चैः व्यलपत्। 'महर्षे कृपया दत्तं वरं निवर्तयतु। इयं कुमारी मम जीवितम्' इति न्यवेदयत्।

महर्षिः अवदत् – 'मायादास, त्वया सुवर्णं महत्तमं गणितम्। वस्तुतः तत् तुच्छम्। उद्यानात् जलमानय। तेन जलेन सिक्तानि वस्तूनि पूर्वामवस्थां प्राप्स्यन्ति।' इत्युक्त्वा मुनिः तत्रैवान्तर्हितः।

मायादासः उद्यानात् जलमानयत्। सौवर्णानि वस्तूनि तेन जलेन सिक्तानि स्वां स्वां प्रकृतिं प्राप्तानि। तस्य सुता मन्दं हसन्ती पितुः मानसमतोषयत्।

अतिलोभो न कर्त्तव्यः, स तु दुःखस्य कारणम्।

**121.** निम्नलिखितेषु 'लुब्ध' शब्दस्य कः पर्यायवाची ?

(1) लोलुपः (2) कृपणः (3) निर्धनः (4) मितव्ययी

**122.** 'सन्तुष्टः अभवत्' इत्यस्मिन् अर्थे गद्यांशे कः शब्दः प्रयुक्तः ?

(1) व्यलपत् (2) न्यवेदयत् (3) अस्पृशत् (4) अतुष्यत्

**123.** 'मुनिनैवम्' अत्र कः सन्धिः वर्तते ?

(1) यण् सन्धिः (2) दीर्घसन्धिः (3) गुणसन्धिः (4) वृद्धिः सन्धिः

**124.** निम्नलिखितेषु कः शब्दः क्त-प्रत्ययान्तः नास्ति ?

(1) सुन्दराणि (2) जातानि (3) स्थितानि (4) स्पृष्टानि

**125.** मायादासः किमर्थं पिपासां शामयितुं समर्थः नासीत्?

(1) नगरे जलस्य अभावः आसीत्
(2) कूपे जलम् अशुष्यत्
(3) तडागस्य जलं दूषितम् आसीत्
(4) तेन स्पृष्टं जलम् सुवर्णपिण्डम् अभवत्

**126.** राज्ञः पुत्री केन कारणेन दुःखिता अभवत्?

(1) राज्ञः स्पर्शेन कुसुमानि अदृष्टानि अभवन्
(2) कुसुमानि सुन्दराणि नासन्
(3) कुसुममञ्जरी स्वर्णमयी जाता
(4) कुसुमानि सुगन्धितानि नासन्

**127.** मायादासः कीदृशः भूपतिः आसीत्?

(1) वीरः (2) अतिलुब्धः (3) उदारः (4) बलिष्ठः

**128.** मायादासेन स्पृश्यमानाः पदार्थाः मुनिवरेण कीदृशाः अभवन्?

(1) मृन्मयाः (2) लौहमयाः (3) राजताः (4) सौवर्णाः

**निम्नलिखितं गद्यांशं पठित्वा सप्तप्रश्नानाम् (129 - 135) उत्तराणि यथोचितं विकल्पं चित्वा देयानि।**

एकदा मोहनदासः मित्रैः सह एकं नाटकं द्रष्टुमगच्छत्। तस्मिन् राज्ञः हरिश्चन्द्रस्य कर्मनिष्ठा गहनतमा सत्यभक्तिश्च प्रदर्शिते आस्ताम्। असौ निजपत्न्याः अपि श्मशानकरं गृहीत्वा सत्यमपालयत्। नाटकं दृष्ट्वा मोहनदासस्य चेतसि महत् परिवर्तनं सञ्जातम्। असौ चिरम् अरोदीत, मनसि सङ्कल्पञ्च अकरोत् यत् सत्यरक्षायां स हरिश्चन्द्र इव आचरिष्यति।

एकदा गाइल्सनामा विद्यालयनिरीक्षकः विद्यालयमागतः। तत्र एकस्यां कक्षायां बालानां वर्णविन्यासज्ञानं परीक्षितुमारभत। मोहनदासं विहाय सर्वे बालाः शुद्धं वर्णविन्यासम् अकुर्वन्। सः केट्ल (Kettle) इत्यस्य शब्दस्य वर्णविन्यासं कर्तुं नाशक्नोत्।

आत्मनः संदिग्धां प्रतिष्ठां चिन्त्यमानः तस्य शिक्षकः आतङ्कितः अभवत्। सः शिक्षकः निकटस्थश्यामपट्टतः शुद्धां वर्तनीम् अनुकर्तुं सङ्केतेन मोहनदासं प्रैरयत्।

यद्यपि निरीक्षकस्य ध्यानम् अन्यत्र आसीत् तथापि मोहनः सम्मुखमवलोकयन् अपि शिक्षकस्य अनुकरणं नाकरोत्। सहपाठिनाम् उपहासभूमिः भविष्यामि, शिक्षकस्य कोपभाजनताञ्च गमिष्यामि इत्यपि सः नाचिन्तयत्। सः जानाति स्म यद् वञ्चनातः सत्यस्य गोपनं कदापि भवितुं नार्हति।

कक्षाया अनन्तरं मोहनस्य शिक्षकः तस्मै अकुप्यत्, सहपाठिनश्च तस्योपहासम् अकुर्वन्। यदायं गृहं परावर्तत तदात्मानं क्षतम् अवसन्नञ्च अन्वभवत्। परं गभीरे अन्तरात्मनि स्वसङ्कल्पं स्मारं स्मारं नवां द्युतिं नवं सामर्थ्यञ्च अधिगतवान्।

अत एवोक्तम् –

**सत्यान्नास्ति परं तपः।।**

**129.** गद्यांशे प्रयुक्तस्य 'वञ्चनातः' इत्यस्य शब्दस्य अर्थे किम् शब्दः प्रयोक्तुं शक्यते?

(1) व्यवहारकौशलात्
(2) हरिश्चन्द्रस्य मिथ्यादूषणात्
(3) छलात्
(4) दूषितव्यवहारात्

**130.** 'अकरोत्' पदम् कस्य लकारस्य विद्यते?

(1) लोट्लकारस्य
(2) लुङ्लकारस्य
(3) लङ्लकारस्य
(4) लट्लकारस्य

**131.** नाटके किं प्रदर्शितम् आसीत्?

(1) हरिश्चन्द्रस्य सत्यभक्तिः (2) हरिश्चन्द्रस्य निर्दयता

(3) छलप्रपञ्चः (4) हरिश्चन्द्रस्य क्रूरता

**132.** 'चिन्त्यमानः' इत्यस्मिन् पदे कः प्रत्ययः?

(1) मानच् (2) शतृ (3) मतुप् (4) शानच्

**133.** शिक्षकः किमर्थं आतङ्कितः अभवत्?

(1) निरीक्षकमहोदयः क्रुद्धो भविष्यति

(2) मोहनदासः व्यावहारिकः नासीत्

(3) मोहनदासं विहाय सर्वे बालाः शुद्धं वर्णविन्यासम् अकुर्वन्

(4) मोहनदासस्य प्रतिष्ठा धूमिला भविष्यति इति विचारार्थम्

**134.** विद्यालयनिरीक्षकः बालानां किम् ज्ञानं परीक्षितुम् आरभत्?

(1) बालानां चरित्रस्य शुद्धताम् परीक्षितुम् (2) बालानां सत्यनिष्ठां परीक्षितुम्

(3) बालानां पठनस्य योग्यताम् (4) वर्णविन्यासज्ञानं परीक्षितुम्

**135.** मोहनदासः किं सङ्कल्पम् अकरोत्?

(1) सः यथावसरं सत्यस्य पालनं करिष्यति (2) सः दुःखितां महिलां जानन् अपि निष्करुणो न भविष्यति

(3) सः हरिश्चन्द्र इव आचरिष्यति (4) सः सत्यरक्षायाम् हरिश्चन्द्र इव क्रूरो न भविष्यति

**136.** बालकान् कथाश्रावणस्य विषये निम्नलिखितेषु किम् असत्यम् अस्ति?
कथाश्रवणं छात्रान् एवं सहायतां कुर्वन्ति -

(1) समस्यासमाधानकौशलम् विकासयन्ति।

(2) जीवने आचरणीयानि नवीननैतिकमूल्यानि शिक्षन्ति।

(3) ते नवीनान् शब्दान् शिक्षन्ति तथा आत्मनः शब्दराशिं विस्तारयन्ति।

(4) वाक्यसंरचनां शिक्षन्ति।

**137.** कश्चिद् अध्यापकः एकं दृश्य-श्रव्य लघुचित्रं (Video) प्राप्नोति यत् एककस्य शीर्षकस्य अनुकूलं वर्तते। स लघुचित्रम् अधिकृत्य युगलकार्यं प्रायोजयति। अस्य युगलकार्यस्य उद्देश्यं छात्रान् प्रोत्साहयितुं अस्ति -

(1) अध्यापकात् स्वतन्त्रा भूत्वा कार्यं कर्तुम् (2) भाषा-बोधं विकासयितुम्

(3) आत्मनः कार्यस्य मूल्याङ्कनं कर्तुम् (4) तीव्रगत्या मिलित्वा कार्यं कारयितुम्

**138.** भाषाशिक्षणाय लघुकथानां संकलनं, अपरे च पाठ्याः पूरकपठनसामग्रीरूपे निर्धारिताः सन्ति। पूरकपठनसामग्र्याः मुख्यप्रयोजनम् किम् अस्ति ?

(1) नैतिकशिक्षणं प्रोत्साहयितुम् (2) विस्तृत (Extensive) पठनं प्रोत्साहयितुम्

(3) बहुभाषीयतां प्रोत्साहयितुम् (4) गहनपठनं प्रोत्साहयितुम्

**139.** पञ्चमीकक्षायां कश्चिद् अध्यापक: छात्रान् कथां लेखितुं कार्यं दत्तवान् यावत् छात्रा: कथां लिखन्ति, अध्यापक: तान् छात्रान् सहायतां दातुं कक्षाया: परित: भ्रमति ये अशुद्धी: कुर्वन्ति अथवा नवीनशब्दान् पृच्छन्ति। अत्र अध्यापक: कस्य दायित्वे वर्तते।

(1) सहायकस्य
(2) निदानकर्तु: (Diagnostician)
(3) प्रबन्धकस्य
(4) योजनानिर्मातु:

**140.** निम्नलिखितेषु किं भाषाशिक्षकस्य प्रमुखं दायित्वम् अस्ति ?

(1) छात्राणां विभिन्नकक्षासु समूहीकरणम्
(2) छात्राणां निर्देशनम्
(3) छात्रस्य सम्प्रेषणात्मकआवश्यकतानाम् अभिज्ञानम्
(4) पाठनाय विषय-वस्तो: चयनम्

**141.** **कथनम् ( अ ) :** भाषा केवलं शब्दस्य शुद्धोच्चारणाद् अधिका अस्ति।

**कारणम् ( आ ) :** पठनम् निष्कूटीकरणम् अस्ति।

निम्नविकल्पेभ्य: **उचितं** विकल्पं चित्वा प्रश्नानाम् उत्तराणि देयानि –

(1) **( अ )** सत्यम् अस्ति, परं **( आ )** असत्यम् अस्ति।
(2) **( अ )** असत्यम् अस्ति, परं **( आ )** सत्यम् अस्ति।
(3) **( अ )** तथा **( आ )** उभे सत्ये स्त:, तथा **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या अस्ति।
(4) **( अ )** तथा **( आ )** उभे सत्ये स्त:, परं **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या नास्ति।

**142.** भाषाअध्यापने निम्नलिखितेषु का अवधारणा असत्यम् अस्ति ?

(1) भाषाशिक्षणम् सम्प्रेषणात्मकक्रियासु केन्द्रितम् भवितव्यम्
(2) भाषाशिक्षणे भाषणापेक्षया लेखने महत्त्वं दातव्यम्
(3) छात्रा: भाषां वास्तविकपरिस्थितिषु प्रयोगस्य प्रयासेन भाषाया अधिग्रहणं कुर्वन्ति।
(4) छात्राणां प्रथमा भाषा भाषाशिक्षणे महत्त्वपूर्णं योगदानं ददाति

**143.** निम्नलिखितेषु किं भाषाअधिग्रहणस्य व्यवहारवादि-सिद्धान्तेन सम्बन्धितम् नास्ति।

(1) प्रयास: त्रुटयश्च
(2) सामाजिक-अन्त:सम्पर्क:
(3) कार्यानुकूलनम् (Operant Conditioning)
(4) रिक्तपात्रम्

**144.** छात्रा: प्रत्यक्षीकुर्वन्तु तथा गहनतया निमज्जन्तु

(1) प्रारम्भिक-अवस्थाया: एव बहुमौखिकभाषासु
(2) प्रारम्भिक-अवस्थाया: एव बहुलिखितभाषासु
(3) प्रारम्भिक-अवस्थाया: एव द्वयो: मौखिकभाषयो:
(4) प्रारम्भिक-अवस्थाया: एव द्वयो: लिखितभाषयो:

**145.** **कथनम् ( अ ) :** प्रारम्भिकसाक्षरतायां चित्राङ्कनम् लेखनस्य प्रारम्भः मन्यते।

**कारणम् ( आ ) :** चित्राणि प्रतीकानि सन्ति तथा अर्थं कथयन्ति।

निम्नलिखितेभ्यः विकल्पेभ्यः समुचितानि उत्तराणि देयानि।

(1) **( अ )** सत्यम् अस्ति, परं **( आ )** असत्यम् अस्ति।

(2) **( अ )** असत्यम् अस्ति, परं **( आ )** सत्यम् अस्ति।

(3) **( अ )** तथा **( आ )** उभे सत्ये स्तः, तथा **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या अस्ति।

(4) **( अ )** तथा **( आ )** उभे सत्ये स्तः, परं **( अ )**, **( आ )** इत्यस्य समीचीना व्याख्या नास्ति।

**146.** कश्चिद् अध्यापकः भाषाकार्ये छात्राणां मिश्रितयोग्यतासमूहं निर्माति। मिश्रितयोग्यतासमूहः निर्मीयते –

(1) छात्रान् परस्परं सहायतां कर्तुं प्रोत्साहयितुम्

(2) अध्यापकस्य कार्यभारं आंशिकरूपेण ग्रहीतुं यतः अध्यापकः सर्वेषु ध्यानं दातुं न शक्नोति

(3) दुर्बलतरान् छात्रान् ज्ञातुम्

(4) छात्रान् प्रभावयितुं स्वविचारान् स्वच्छन्दतया कथयितुं अवसरं लब्धुम्

**147.** छात्रेण स्वकक्षायां पठितां कथां पुनः स्वशब्देषु श्रावणम् निम्नलिखितस्य मूल्याङ्कने सहायतां करोति –

(1) अर्थावबोधस्य (2) स्मृतेः (3) शुद्धतायाः (4) प्रवाहस्य

**148.** **कथनम् ( अ ) :** संशोधनात्मकम् अध्यापनं अध्ययन-अध्यापनप्रक्रियायाः अविभाज्यम् अङ्गम् अस्ति।

**कारणम् ( आ ) :** संशोधनात्मकम् अध्यापनम् पुनः अध्यापनार्थम् अस्ति। इदम् आवश्यकं नास्ति यत् सः एव विधिः नियोजयितव्यः यस्मिन् भाषायाः अङ्गानि समुपयुक्तविधिना न शिक्षितानि।

निम्नलिखितविकल्पेभ्यः **समुचितं** उत्तरं दीयताम्।

(1) **( अ )** सत्यम् अस्ति, परन्तु **( आ )** असत्यम् अस्ति।

(2) **( अ )** असत्यम् अस्ति, परं **( आ )** सत्यम् अस्ति।

(3) **( अ )** तथा **( आ )** उभे सत्ये स्तः, तथा **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या अस्ति।

(4) **( अ )** तथा **( आ )** उभे सत्ये स्तः, परं **( आ )**, **( अ )** इत्यस्य समीचीना व्याख्या नास्ति।

**149.** न्यूनातिन्यून-युगल-अभ्यासः निम्नलिखितं वर्धयितुं प्रभावि-पद्धतिः भवितुं शक्यते।

(1) उच्चारणम् (2) पठनावबोधम् (3) व्याकरणम् (4) शब्दावलीम्

**150.** आधारभूत-अवस्थायां छात्राः सर्वाधिकाः सहजाः भवन्ति तथा सर्वोत्कृष्टरूपेण शिक्षन्ति –

(1) गृहभाषायाम् (2) आंग्लभाषामाध्यमे (3) शिक्षणमाध्यमे (4) राज्यभाषायाम्

- o 0 o -

